# पाठकविमर्शः

**पूर्णचन्द्र–उपाध्यायः**

वाच्यवाचकसौन्दर्यशालिन्यतिविचित्रेऽस्मिन्संस्कृतसाहित्यजगति नैकाः शोधपत्रिकाः प्रकाशिताः, प्रकाश्यन्ते, प्रकाशयिष्यन्ते च, परन्तु न तासां समासां तथाभूतं महत्त्वं चित्ताकर्षकत्वं च साहित्यसमीक्षकाणां ज्ञानसुधालोलुपानां कृते यथा सागरोपमायाः ज्ञानगाम्भीर्यवत्याः सागरिकायाः। यतोहि एकचत्वारिंशद्वर्षेभ्यः निरन्तरं प्रकाश्यमानायाः अन्ताराष्ट्रियख्यातिप्राप्तायाः सुधानिषन्दिन्याः त्रैमासिक्याः संस्कृतशोध–पत्रिकाया अस्याः नानाशास्त्रावगाहिदर्शनोपेतरचनावैविध्यं न केवलं प्रौढ–मतीनां शास्त्रनिष्णातानां हृदयावर्जकत्वं, अपि तु कोमलमतीनां गीर्वाण–वाणीभण्डारप्रवेशार्थिनां नवनवज्ञानपिपासूनां बालानामपि परमोपयोगि–त्वमावहतीति अस्त्यत्र किमप्यपूर्वाभिधानत्वम्।

विगतविंशतिवर्षेभ्यः शोधपत्रिकाया अस्याः पाठकरूपेण कवचिच्या–लेखप्रकाशनमाध्यमेन चास्ति नोऽनया सह कश्चिद् दृढीयान् सम्बन्धः। अत–एव प्रौढमनुभवमवलम्ब्य एव एवं वक्तुं–शक्येत यत् शोधपत्रिकायाः अस्याः वैशिष्ट्यमिदं यदस्याः प्रकाशननैरन्तर्यं पाठकसंख्यागुरुत्वञ्च सर्वथा वरीवर्त्तिनी। तदस्यां पत्रिकायां प्रकाश्यमानानामालेखानां वैविध्यमप्यस्या अपरं वैशिष्ट्यम्। अपि च विद्यार्थिभ्यः परमविदुष आचार्य– वर्यान् यावत् समेषां कृतेऽस्त्यस्यामवसरः सुलभः स्वप्रतिभाप्रकर्षविवर्धनाय इत्यस्याः किमप्यनन्यमौदार्यम्,

पत्रिकाया अस्याः एकचत्वारिंशद्वर्षात्मकसुदीर्घयात्रायां भारतीय–संस्कृतिविशेषाङ्कादारभ्य काव्यशास्त्रविशेषाङ्कं यावत् प्रकाशिताः पञ्चदशसंख्यकाः विशेषाङ्काः गरिमत्वमस्या अत्यर्थं प्रकटयन्ति। सर्वोऽपरि पत्रिकायामस्यां प्रकाश्यमानेष्वालेखेषु मुद्रणगतानां सम्पादनगतानां चाशुद्धीनां सर्वथाऽभावत्वं परिलक्ष्यते इत्यस्याः सम्पादनमण्डलस्याप्रमादत्वं साधुवादार्हत्वं च स्वतः प्रकट्येते।

सागरिकामन्दाकिनीयं सुदीर्घयात्रायां स्वपथि बहुविधबाधां तिरस्कुर्वन्ती जनिकालादारभ्य इदानीं यावद् गुरुशिष्यपरम्परयैव सम्पादनत्वमादधती निरवच्छिन्न–भारसमर्था इत्यस्या अनुपममद्वितीयं वैशिष्ट्यम् इति दिक्।

*संस्कृतविभागाध्यक्षः*
*राजकीयमहाविद्यालयः,*
*भवानीमंडी (राज.)*